International Journal of Sanskrit Research 2023; 9(4): 16-18

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 16-18
© 2023 IJSR
www.anantaajournal.com
Received: 13-05-2023
Accepted: 17-06-2023

**Dr. R Naveen**
Associate Professor, SCSVMV University, Enathur, Kanchipuram, Tamil Nadu, India

**Corresponding Author:**
**Dr. R Naveen**
Associate Professor, SCSVMV University, Enathur, Kanchipuram, Tamil Nadu, India

# तत्त्वचिन्तामणौ समवायवादसिद्धान्ते नव्यमतविमर्शः

**Dr. R Naveen**

**सारांश:**

गङ्गेशोपाध्यायप्रणीततत्त्वचिन्तामणौ समवायवादः इति सन्दर्भः वर्तते।तत्र समवायः अस्ति न वा इति मतभेदेन विचारितः।तत्र नव्यमतमेव विचार्यते प्रबन्धे अस्मिन्।इमे विषयाःनिरूप्यन्ते। नव्यमतरीत्या समवायसाधनम् नव्यमतरीत्या समवायसाधकानुमानोपन्यासः नव्योपदर्शितं द्वितीयसमवायसाधकानुमानान्तरमिति।

**कूटशब्दः** समवायः,विशिष्टबुद्धिः,निरूप्यनिरूपकभावः, अभावादिविशिष्टबुद्धिः

## प्रस्तावना

अत्र नव्यैः समवायसाधकमनुमानद्वयं प्रदश्र्यते। तत्र आद्यं अनुमानं गुणक्रियादिविशिष्टबुद्धिः सम्बन्धिभिन्नविशेषणसम्बन्धविषया निर्विषयकभावविशेषणकविशिष्टबुद्धित्वात् दण्डीतिविशिष्टबुद्धिवत्। अत्र हेतुकुक्षौ निर्विषयकत्वं, भावत्वञ्च विशेषणांशे विशेषणम्। यथा दृष्टान्ते दण्डीति विशिष्टबुद्धौ निर्विषयकभावात्मकदण्डप्रकारक विशिष्टबुद्धित्वं वर्तते। तत्र च सम्बन्ध्यात्मकदण्डभिन्नसंयोगविषयकत्वं सिद्धम्। तथा पक्षे नीलो घटः इत्याकरकगुणादिविशिष्टबुद्धौ निर्विषयकभावात्मकस्य नैल्यादेः विशेषणत्वात् निर्विषयकभावविशेषणकविशिष्टबुद्धित्वरूपहेतोः सत्त्वात् तत्र नीलरूपादिसम्बन्धिभिन्नसम्बन्धविषयकत्वं सिद्धति। स एव समवायापदाभिधेय इति। निरुक्तानुमाने हेतुशरीरे 'भाव' इति विशेषणानुपादाने सम्बन्धिभिन्नसम्बन्धविषयकत्वाभाववत्त्यां घटाभाववद्भूतलमिति विशिष्टबुद्धौ निर्विषयकविशेषणकविशिष्टबुद्धित्वसत्त्वात् व्यभिचारः स्यात्। तद्वारणाय भावेतिविशेषणं देयम्। तथा च घटाभाववद्भूतलमिति विशिष्टबुद्धौ भासमानस्य विशेषणस्य घटाभावादेः भावत्वविरहान्न व्यभिचारः। एवं निर्विषयकेति विशेषणानुपादाने सम्बन्धिभिन्नसम्बन्धविषयकत्वाभाववत्यां "ज्ञातो घटः" "इष्टो घटः" इत्यादिविशिष्टबुद्धौ

भावात्मकज्ञानादिविशेषणकविशिष्टबुद्धित्वस्य सत्वात् व्यभिचारः स्यात्। तद्वारणाय निर्विषयकेति विशेषणं देयम्। तन्निवेशे "ज्ञातो घटः" इत्यादिविशिष्टबुद्धौ भासमानस्य विशेषणस्य ज्ञानादेः निर्विषयकत्वविरहान्न व्यभिचारः। तथा च गुणक्रियाजातिविशिष्टबुद्धिः यासन्धिभिन्नविशेषण सम्बन्धविषया निर्विषयकभावविशेषणकविशिष्टबुद्धित्वात् इत्यनुमानेन समवायः सिद्धः इति।

**नव्यमतरीत्या समवायसाधकानुमानोपन्यासः**

नव्यास्तु गुणक्रियाजातिविशिष्टबुद्धिः सम्बन्धिभिन्नविशेषणसम्बन्धविषया इतरनिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वात्। यथा दण्डितिविशिष्टबुद्धिः। दण्डीतिविशिष्टबुद्धौ भासमानस्य विशेषणीभूय दण्डस्य इतरनिरूप्यत्वाभावात् इतरनिरूपणानिरूप्यदण्डविशेषणकविशिष्टबुद्धित्वं हेतुः वर्तते। तत्र सम्बन्धिभूतदण्डभिन्नविशेषणसम्बन्धात्मकसंयोगविषयकत्वम् साध्यं वर्तते इति दृष्टान्ते समन्वयः। एवं प्रकृते पक्षे नीलो घटः इत्यादि गुणादिविशिष्टबुद्धौ गुणादिभूतविशेषणस्य अन्यनिरूप्यत्वविरहेण इतरनिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वहेतोः सत्त्वात् सम्बन्धिभूतगुणादिभिन्नः विशेषणस्य सम्बन्धः समवायाख्य सिद्धति इति भावः।

इतरत् यन्निरूपणम्, इतरनिरूपणम्, तेनाऽनिरूप्यं विशेषणम् यस्यां सा इतरनिरूपणानिरूप्यविशेषणकविशिष्टबुद्धिः तत्त्वमित्यर्थः अत्र हेतुघटकेतरपदार्थपरिचायकः निरूपणशब्दः, च तेन निरूपणशब्दस्य व्यभिचारावारकत्वेऽपि न क्षतिः। तथा च अन्यानिरूप्यविशेषणकविशिष्टबुद्धित्वमिति हेतुः फलितः। एवं च अभावादिविशिष्टबुद्धौ ज्ञानादिविशिष्टबुद्धौ च न व्यभिचारः। तस्यां च बुद्धौ भासमानविशेषणस्य अभावज्ञानादेः प्रतियोगिविषयादिना इतरेण निरूप्यत्वात् इतरनिरूप्यविशेषणकविशिष्टबुद्धित्वरूपहेतोः विरहात् न व्यभिचारः।

ननु "भूतले घटाभावः", " भूतले ज्ञानम्" इति अभावज्ञानादिविशेष्यकबुद्धौ निरुक्तसाध्याभाववत्त्याम् निर्विषयक भावविशेषणकविशिष्टबुद्धित्वस्य इतरनिरूपणा निरूप्यविशेषणकबुद्धित्वस्य वा हेतोः सत्त्वात् व्यभिचार इति चेत्त् न निरुक्तहेतुघटकविशेषणकेतिपदस्य विषयकत्यर्थः। तथा च निर्विषयकभाव विषयकविशिष्टबुद्धित्वस्य, इतरनिरूपणानिरूप्यविषयकविशिष्टबुद्धित्वस्य वा हेतुत्वात्। इति। न च नव्योपदर्शितम् समवायसाधकहेतुद्वयं अप्रयोजकमिति शङ्क्यम्। हेतोः अप्रयोजकत्वे हेतोः उपाधिमत्त्वस्य तन्त्रत्वात्। यथा पर्वतो धूमवान् वह्नेरित्यादौ वह्नेः आद्रेन्धनसंयोगरूपोपाधिशालित्वात् वह्नेः धूमानुमापकत्वे अप्रयोजकत्वम्। तथा इह नव्यैः उपहेतोर्शितसमवायसाधकानुमानद्वयेऽपि कस्यापि उपाधेः अनुपलम्भात् उपाधिरहितत्वेन तद्देतुद्वयमपि नाप्रयोजकमिति भावः।

**नव्योपदर्शितं द्वितीयसमवायसाधकानुमानान्तरम्**

गुणक्रियाजातिसाक्षात्कारः इन्द्रियसम्बन्धसाध्यः जन्यप्रत्यक्षत्वात् दण्डिज्ञानवत् इति। अनुमानमिदं जन्यपत्यक्षे इन्द्रियस्य इन्द्रेइयसम्बन्धस्य वा कारणत्वाभिप्रायेण। यथा घटचाक्षुषादौ संयोगेन चक्षुषः चक्षुसंयोगस्य कारणत्वमिति। दृष्टान्ते दण्डीति साक्षात्कारे जन्यसाक्षाकारत्वं हेतुः विद्यते, एवं संयोगरूपैन्द्रियसम्बन्धजन्यत्वं साध्यं च विद्यतेति समन्वयः। एवं प्रकृते नीलो घटः इति गुणादिसाक्षात्कारेऽपि जन्यसाक्षात्कारत्वरूपहेतोस्सत्त्वेन इन्द्रियसम्बन्धजन्यत्वं सिध्यति इति।

**अयं भाव**

इन्द्रियसम्बन्धजन्यत्वव्याप्यजन्यसाक्षात्कारत्ववान् गुणादिसाक्षात्कारः इति परामर्शात् सिद्यतः सम्बन्धस्य एकत्वे लाघवमिति लाघवज्ञानसहकृतात् जायमानानुमितौ

गुणादिसाक्षात्कारः इन्द्रियैकसम्बन्धजन्यः इत्याकारिकायां विषयत्वेन गुणादिना इन्द्रियस्य सम्बन्धः एकः इति सिध्यति। सः एव संयुक्तसमवायादिः इत्युच्यते। न च गुणादिना इन्द्रियस्य साक्षात्सम्बन्धः संयोगोऽस्तु इति वाच्यम्। संयोगसामान्यं प्रति द्रव्यस्यैव समवायिकारणत्वेन गुणादौ इन्द्रियसंयोगस्य अनुत्पत्तेः इति गुणादिः संयोगाभाववान् इति इन्द्रियसंयोगाभाववान् इति बाधनिश्चयस्य प्रतिबन्धकस्य सत्त्वात् न अनुमितौ संयोगः विषयः इति।

तथा च नव्योपदर्शितानुमानद्वयेनापि सम्बन्धिभिन्नविशेषणसम्बन्धविषयकत्वं सिध्यति। सः सम्बन्धिभिन्नः विशेषणसम्बन्धः अविशिष्टधीव्यावृत्तविशिष्टधीनियामकलक्षणः समवायपदाभिधेयः सिध्यति इति। अत्र अविशिष्टधीननां निर्विकल्पकम्। विशिष्टधीनियामकत्वं नाम विशिष्टधीजनकतावच्छेदकविलक्षणविषयाश्रयत्वमित्यर्थः। अयं भावः – अविशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वेन सम्बन्धः यद्यपि सिषाधयिषितः। तथाऽपि "अविशिष्टधीव्यावृत्तविशिष्टधीनियामकविषयकत्वव्याप्यविशिष्टबुद्धित्ववती इयम्" इति परामर्शदशायां सिद्ध्यतः अविशिष्टधीव्यावृत्तविशिष्टधीनियामकस्य सम्बन्धस्य "समवायत्वे लाघवम्" इति लाघवज्ञानसहकृतपरामर्शात् जायमानाऽनुमित्या सम्बन्धिभिन्नःसमवायाख्यः सम्बन्धः सिध्यति इति।

न च गुणादिसाक्षात्कारे नीलो घटः इत्याकारके इन्द्रियसंयुक्तविशेषणता एव सन्निकर्षोहेतुभूतोऽस्तु इति वाच्यम्। विशेषणतायाः गुणादिसाक्षात्कारहेतुभूतसन्निकर्षत्वेन अङ्गीकारे विशेषणतायाः सम्बन्धस्य तत्तद्विशेषणरूपत्वेन अनन्तानुगतसम्बन्धकल्पने गौरवं स्यात्। एकस्य अनुगतस्य प्रतियोगि-अनुयोगिभिन्नस्य गुणादिसाक्षात्कारे हेतुत्वस्वीकारे लाघवसम्भवादिति भावः। अनुगतसंयुक्तसमवायादेः गुणादिसाक्षात्कारे हेतुत्वस्वीकारेणैव अनुगतकार्यकारणभावः सिध्यति। असति बाधके अनुगतकार्यकारणभावस्य प्रमाणत्वात्। एवं रूपत्वादिजातिसाक्षात्कारः इन्द्रियसम्बन्धसाध्यः जन्यसाक्षात्कारत्वात् दण्डीतिसाक्षात्कारवत् इत्यनुमानेनापि संयुक्तसमवेतसमवायसिद्धिः। तत्रापि पूर्वोपदर्शितलाघवयुक्त्या इन्द्रियसम्बद्धविशेषणता न अनुमितिविषयः। यतः इन्द्रियसम्बद्धविशेषणतायाः तत्तद्विशेषणरूपत्वेन अननुममात् इति भावः। अत एव संयोगो विशेषणता च प्रत्यासतिः इति पक्षोऽपि दूषितः भावः विशेषणतायाः इन्द्रियप्रत्यासतित्वेनाभ्युपगमे विशेषणतायाः तत्तद्विशेषणरूपत्वेन तस्याः अननुगतत्वमिति। इन्द्रियसम्बन्धत्वेन सिद्धस्य समवायस्य प्रत्यक्षत्वं स्वीक्रियते। सम्बन्धिद्वयसाक्षात्कारजन्यत्वात् सम्बन्धसाक्षात्कारस्येति। तथा च निरुक्तानुमानैः लाघवादेकः समवायः सिद्धः इति।

## References

1. तत्त्वचिन्तामणिः, Gangeshopadhyaya, Published by-Chowkambha sanskrit Series, Varanasi.
2. तत्त्वचिन्तामणिप्रकाशः, Ruchidatta mishra, Edited by N.S. Ramanuja Tatacharya, RS vidyapeetam, Tirupati.
3. सिद्धान्तमुक्तावलिः, Vishvanatha panchanana, Published by -Chowkambha sanskrit Series, Varanasi.
4. वैशेषिकसूत्रम्, Maharshi kanada, Published by -Chowkambha sanskrit Series, Varanasi.
5. आलोकः, Pakshadhara mishra, Published by -Chowkambha sanskrit Series, Varanasi.